with the verbs expressing a certain sense. cf. आख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणी । एवं चेद् यथाशक्ति व्यवस्था भवितुमर्हति । तथा, "अञ्जलिना सक्तून् प्रदाव्ये जुहोति" इति । द्विहस्तसंयोगोऽञ्जलिः, स व्याकोशोऽर्थात् कर्तव्यः । तथा हि शक्यते होमो निर्वर्तयितुम् । तद् यथा, कटे भुङ्क्ते कांस्यपात्र्यां भुङ्क्ते इत्यर्थात् कल्प्यते कटे समासीनः कांस्यपात्र्यामोदनं निधाय भुङ्क्ते इति । ŚB. on MS. 1. 4. 25.

**आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा** That which at the beginning and the end has no [ real ] existence, has none either during the intervening period. The Vedāntins of Śaṁkara's school hold that existence is of three kinds, namely, पारमार्थिक (true), of which Brahman is the sole representative, —व्यावहारिक ( practical ), to which all phenomena belong, and प्रातिभासिक ( apparent ), which includes such things as a snake surmised in a rope, or nacre mistaken for silver. The second and third kind, therefore, have no real existence from the beginning to the end of their supposed existence.

**आम्रसेकपितृतर्पणन्यायः** Watering a mango-tree, and, at the same time, satisfying the Manes with a libation. The maxim is used to illustrate an act of bringing about two results by one operation. cf. कथं पुनरेकेन यत्नेनोभयं लभ्यम् । लभ्यमित्याह । कथम् । द्विगता अपि हेतवो भवन्ति तद्यथा । आम्राश्च सिक्ताः पितरश्च प्रीणिता इति । Mbh. 1. 1. 1; 8. 2. 3.

**आम्रान् पृष्टः कोविदारानाचष्टे** Questioned as to mango trees, he speaks of Kovidāra trees. Its origin is found in Mbh. 1. 2. 45. अन्यद्ब्रुवान् पृष्टोऽन्यदाचष्टे । आम्रान् पृष्टः कोविदारानाचष्टे । cf. तथा हि लोके प्रकृष्टप्रकाशश्चन्द्र इत्यत्र प्रकृष्टपदेनाप्रकृष्टखद्योतादेः प्रकाशपदेनाप्रकाशात्मकान्धकारादेश्च व्यवच्छेदेन जिज्ञासितश्चन्द्रप्रातिपदिकमात्रार्थः प्रतिपाद्यते । इतरथा आम्रान् पृष्टः कोविदारानाचष्ट इति न्यायेन वक्तुरजिज्ञासार्थमर्थं प्रतिपादयतोऽश्रद्धेयवचनत्वप्रसंगात् । लौकिकन्यायरत्नाकर.

**आमोदषट्पदन्यायः** The maxim of the hidden fragrance understood by the bees. cf. आकारैरेव चतुरास्तर्कयन्ति परेङ्गितम् । गर्भस्थं केतकीपुष्पमामोदेनैव षट्पदाः ॥ A. R.

**आशामोदकतृप्तन्यायः** The illustration of one who is satisfied with sweetmeats in prospect. The maxim speaks of a person who relies on future imaginary good in store for him. आशामोदकतृप्ता ये ये चोपार्जितमोदकाः । रसवीर्यविपाकादि तुल्यं तेषां प्रसज्यते ॥ न्यायकन्दली.

**इक्षुदण्डन्यायः** From top to bottom every part of sugar-cane increases in sweet juice; similar is the case with सज्जनमैत्री. इक्षोरग्रात् पर्वणि पर्वणि यथा रसविशेषः तद्वत् सज्जनमैत्री, विपरीतानां तु विपरीता इति । लौ. न्याय.

**इतो व्याघ्र इतस्तटी** On one side a tiger, on the other a precipice! A serious dilemma. cf. कुटुम्बमपि मे प्रेयः प्रेयांस्त्वमपि हे सखे । किं करोमि द्विधाचित्त इतो व्याघ्र इतस्तटी ॥ हेमचन्द्र.

**इषुकारन्यायः** The illustration of the arrow-maker. It is used of one wholly engrossed in his work, and hence unconscious of his surroundings. cf. इषुकारो नरः कश्चिदिषावासक्तमानसः समीपेनापि गच्छन्तं राजानं नावबुद्धवान् ॥ Mb. 12. 178. 12; इषुकारन्यायेन मुग्धो भविष्यति । यथेषुकारो जाग्रदपीष्वासक्तमनस्तया नान्यान् विषयानीक्षत एवं मुग्धो मुसलसंघातादिजनितदुःखानुभवव्यग्रमनस्तया जाग्रदपि नान्यान् विषयानीक्षत इति । न । अचेतयमानत्वात् । Ś. B. on Br. Sūt. 3. 2. 10.

**इषुवेगक्षयन्यायः** The simile of the gradual diminution of the speed of an arrow. प्रवृत्तफलस्य कर्माशयस्य मुक्तेषोरिव वेगक्षयान्निवृत्तिः । Ś. B. on Br. Sūt. 3. 3. 32.

**उत्कृष्टदृष्टिर्निकृष्टेऽध्यसितव्या** The idea of something higher is to be superimposed upon something lower. एवं प्राप्ते ब्रूमः । ब्रह्मदृष्टिरेवादित्यादिषु स्यादिति । कस्मात्, उत्कर्षात् । एवमुत्कर्षेणादित्यादयो दृष्टा भवन्ति । उत्कृष्टदृष्टेस्तेष्वध्यासात् । तथा लौकिको न्यायोऽनुमतो भवति । उत्कृष्टदृष्टिर्हि निकृष्टेऽध्यसितव्येति लौकिको न्यायः । यथा राजदृष्टिः क्षत्तरि । Ś. B. on Br. Sūt. 4. 1. 5.

**उदरे भृते कोशो भृतः** "When his stomach is full his coffers are full." It is used of a lazy fellow who has no ambition beyond his daily bread, 'whose god is his belly.'

**उपसर्गन्यायः** The maxim of a preposition changing the meaning of a verb. उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥ cf. यत्रैकवस्तुन उपाधिभेदेन नानात्वविवक्षा तत्रायं प्रवर्तते । उपसर्जनमुपसृज्यते वा ... यथैक एवोपसर्गो नानाक्रियायोगरूपोपाधिभेदेन नानार्थतां भजति । लौ. न्याय.

**उभयतःपाशा रज्जुः** A Rope which binds at both ends; an embarrassing position, a dilemma. यद्यपि न बांधस्तथापि विकल्पस्तावत् प्राप्नोति न हि तुल्यार्थानां क्वचित् समुच्चयो दृष्टः । सेयमुभयतःपाशा रज्जुः । तन्त्र. 3. 6. 42.

**उष्ट्रकण्टकभक्षणन्यायः** The maxim of a camel's eating thorns. A camel derives pleasure from eating Śamī leaves not minding the pricking thorns. However, things are not in themselves essentially pleasant or unpleasant, and that what causes pleasure to one may be painful to another, and that even the same thing which at one time is agreeable may at another time be the reverse. उष्ट्रस्य शमीकण्टकवेधजातदुःखकालेऽपि शमीपत्रभक्षणसुखलेशो यथा तथाभीष्टविषयोपार्जनदुःखकाले तदुपार्जितद्रव्यजसुखलेशो यत्रोपदिश्यते तत्रास्य प्रवृत्तिः । वाचस्पत्य; cf. कर्णामृतं सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलस्य । अवेक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ॥ Vikr. 1. 29.

**उष्ट्रलगुडन्यायः** The illustration of the camel and the stick. The very stick carried by the camel is used to strike the camel. This is used to demolish the very objections raised by the opponent against our arguments. अयं हि स्वमते परेणोद्भाव्यमानानां दूषणानां तन्मते पातनेऽवतरति । लौ. न्याय. cf. "Hoist with his own petard." Hamlet 3. 4. The context of this nyāya ( आत्मतत्त्वविवेक ) seems